# निजाम-महाविद्यालयः

## निजामियन - २०१०-११

**********************************

## संस्कृत-विभागः


| | |
|---|---|
| भारतीयं भव्यमतीतम् | डा. विद्यानन्द आर्यः |
| भारतीया संस्कृतिः संस्कृतभाषायाश्च महत्वम् | डा. के. वेङ्कटेश्वर्लुः |
| क्षमाप्रभावः | डा. के. वेङ्कटेश्वर्लुः |
| संस्कृतगीतम् (मनुजानां प्रबोधकम्....) | डा. विद्यानन्द आर्यः |


**********************************

भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा

..................................

*संस्कृतं नाम दैवीवाग् अन्वाख्याता महर्षिभिः*

**********************************

# भारतीयं भव्यमतीतम्

**प्रस्तोता– डा. विद्यानन्द आर्यः**

भारतीयानामस्माकं महत् सौभाग्यं यत् वयं भारतवर्षस्य पुण्यधरायां जन्म गृहीतवन्तः। इयं धरा रामकृष्णप्रभृतिभिर्महापुरुषैः पतञ्जलिबुद्धप्रभृतिभिर्योगिभिः वाल्मीकिव्यासप्रभृतिभिः कविभिः मान्धातृरघुप्रभृतिभिश्चक्रवर्तिशासकैः पावनीकृता। भारतवर्षस्यैव एवंविधा ख्यातिर्यत् अस्यां भूमौ जन्मनः ग्रहणाय देवा अपि उत्सुकाः–

गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरुषाः सुरत्वात्॥ इति।

स्वर्गस्य अपवर्गस्य च कारणभूता इयं भूः सर्वथा देवान् अपि अत्र शरीरस्य धारणाय आकृष्टान् विदधाति। अस्य भारतराष्ट्रस्य संस्कृतिः सा भव्या महनीया संस्कृतिः यां स्वीकृत्य सम्पूर्णः समाजः सुखं समृद्धिं शान्तिं वावाप्तुं शक्नोति। मानवसभ्यतायाः आदिसंविधाननिर्माता महर्षिर्मनुः–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

इति यं निर्देशं कृतवान् यत् समे धरावासिनः स्वं स्वं चरित्रं भारतवर्षस्य द्विजानां सकाशात् शिक्षेरन् इत्यस्याः सत्यतायाः प्रमाणम् अस्मादधिकम् अन्यत् किं स्पष्टं स्यात्– अत्रत्याः वेदानुकूलाः मानवतावादिन्यः मान्यताः सम्पूर्णपृथिव्याः दिग्गजानां विदुषां समाजसुधारकाणां कृते दिग्दर्शनं विदधति। एकोनविंशतिशततमशताब्द्याः जर्मनदेशविदुषः मोक्षमूलरस्य एतद्विषयकं वक्तव्यं ध्यातव्यम्, वक्तव्ये स्थितान् यान् विचारान् स महाभागः स्वतन्त्रताप्राप्त्युद्यमे संलग्नं भारतं प्रत्यागच्छतः आंग्लीयान् प्राशासनिकाधिकारिणः अभिलक्ष्य प्रोक्तवान्–

यदि कश्चिन्मां पृच्छेत् यत्कमाकाशमधः मानवमनः अतुलनीयोपहारैः सहितं पूर्णतया विकसितं समभवत् यत्र जीवनस्य क्लिष्टानां समस्यानां विश्लेषणं समाधानं चापि प्रस्तुतम्, यत् तेषामपि प्रशंसायाः पात्रं सञ्जातम्, ये प्लेटोनामविदुषः कान्टनाविदुषश्च अध्ययनं कृतवन्तः इति चेत् अहं भारतदेशस्य नाम कीर्तयिष्यामि। यदि कश्चिन्मां यत् कतमत् साहित्यं विद्यते येन वयं यूरोपवासिनः (ये अद्य पर्यन्तं केवलं ग्रीकविचारैः रोमनविचारैः यहूदीविचारैश्च पुष्टाः) तान् उत्तुङ्गान् विचारान् प्राप्तुं शक्नुमः, ये अस्माकं जीवनम् अधिकं परिपूर्णम् अधिकं वैश्विकम् अधिकं मानवीयं च विधातुं समर्थाः, ये केवलम् अस्य जीवनस्य कृते एव नैव अपितु देहान्तरार्थं शाश्वतजीवनार्थं च आवश्यकाः इति चेत् अहं पुनः भारतं प्रति सङ्केतयिष्यामि इति।

एवंविधाः मार्कट्वेनस्य विचाराः अपि स्मर्तव्याः, येषु सः प्रोक्तवान्–

भारतीयधरा उपासनामार्गाणां भूमिः मानवजातेः प्रेङ्खा, भाषायाः जन्मभूमिः, इतिहासस्य माता, पुराणानां पितामही परम्पराणां च प्रपितामही विद्यते। मनुष्यजीवनस्य इतिहासे यत्किमपि मूल्यवत् सृजनशीलं च वस्तुजातं, तस्य निधिः केवलं भारते वर्तते इति। मोक्षमूलरस्य मार्कट्वेनस्य च इमे विचाराः प्रलापरूपाः नैव अपितु विश्वेतिहासस्य ताः वास्तविकताः याः संसारस्य प्रबुद्धजिज्ञासवः सत्यान्वेषणम् आधारीकृत्य स्वीकृतवन्तः।

दर्शनस्य अध्यात्मस्य वा क्षेत्रे विद्वद्भिः मुकुटमणित्वेनाङ्गीकृतस्य भारतस्य विषये अद्यतनीया मानवीया सभ्यता कथं विस्मर्तुं शक्नोति यत् संख्याप्रणाल्याः अन्वेषणं भारतवर्षे सञ्जातम्। पञ्चम्यां शताब्द्यां महान् गणितज्ञः आर्यभ ः शून्यस्य प्रयोगं विहितवान्। आर्यभ ात् सहस्रेभ्यो वर्षेभ्यः पूर्वं वैदिककाले शून्यस्य ज्ञानम् अवर्तत। स्थानमूल्यप्रणाल्याः, दशमबिन्दुप्रणाल्याः विकासः भारते विक्रमात् पूर्वम् अभवत्। मनुष्यस्य ज्ञाता प्राचीनतमा चिकित्साप्रणाली आयुर्वेदस्य एव। सप्तविंशतिशतवर्षाणां पूर्वम् अत्रत्याः चिकित्साशास्त्रिणः अतिक्लिष्टाः नेत्ररोग–अवयवप्रत्यारोपण–अश्मरीसम्बद्धाः शल्यक्रियाः विदधति स्म। मस्तिष्कसम्बन्धिनी क्लिष्टतमा शल्यक्रियापि क्रियते स्म। भास्कराचार्यः खगोलशास्त्रिणः स्मार्टतः शतेभ्यः वर्षेभ्यः पूर्वं पृथिव्याः सूर्यप्रदक्षिणायाः अवधिं ज्ञातवान् आसीत्। एष अवधिः पञ्चषष्ट्युत्तरत्रिशतदिनानि यावान् अवर्तत। आर्यभ ः भास्कराचार्यश्च पृथिव्याः गुरुत्वाकर्षणशक्त्या परिचितौ आस्ताम्। एतौ न्यूटनवैज्ञानिकात् सहस्रवर्षपूर्वम् अवर्तेताम्। इह प्रदर्शितानि स्थूलोदाहरणान्येव, ज्ञानेन विज्ञानेन वा सम्बद्धः कश्चन ईदृशो विषयो नास्ति प्राचीनभारतीयानाम् योऽपरिचितः स्यात्।

एवंविधया उन्नतया संस्कृत्या सभ्यतया च समृद्धं महद्दर्शनेन विज्ञानेन च चरमोत्कर्षं प्राप्तमस्माकं राष्ट्रं मानवताविध्वंसकानाम् अत्याचारिजनानां सहस्रविधेषु ष न्त्रेषु अत्याचारेषु च सत्स्वपि संसारस्य कृते शान्तिसंवाहकरूपेण निजस्थाने अचलं दरीदृश्यते। अद्यापि विश्वसमुदायस्य पुरस्तात् वयं सगर्वम् एतत् वक्तुं प्रभवामः–

यूनान मिस्र रोमा सब मिट गये जहां से।
कुछ बात है कि हस्ती मिटती नहीं हमारी॥

वर्तमानसमयेऽपि भारतराष्ट्रं तत् प्राचीनं वैभवयुतं महद्गौरवं प्राप्तुं शक्नोति। एतदर्थं वयं भारतीयाः स्वेषु हृदयेषु प्रबलायाः राष्ट्रियभावनायाः जागरणं करवाम, यदर्थं श्रुतिः प्रेरयति–

वयं राष्ट्रे जागृयाम पुरोहिताः इति।

सर्वे राष्ट्रस्योन्नत्यै सर्वविधकष्टानां साम्मुख्यं अङ्गीकृत्य सचेष्टाः भवन्तु, सावधानाः स्युः। अथर्ववेदर्षिः मानवान् मातृभूम्यै 'वयं तुभ्यं बलिहृतः स्याम' इति पावनसन्देशेन अग्रेसरान् विदधाति। अद्य राष्ट्रस्य प्रत्येकं जनः स्वीयान् राजनैतिकान् सामाजिकान् आर्थिकान् च क्षुद्रान् स्वार्थान् विहाय जातिवादस्य विषवेलां विच्छिद्य भारतीयसंस्कृतेः संरक्षायै शाश्वततायै कटिबद्धः सन् सकलां मानसिकतां कुदिशं प्रति प्रेरयन्तीं पाश्चात्यसंस्कृतिं सभ्यतां च दूरतः परित्यजन् राष्ट्रघातिनीः कुशक्तीः अभिभवन् निजकर्तव्यं क्रियारूपमानयेत्।

# भारतीया संस्कृतिः संस्कृतभाषायाश्च महत्वम्

**– प्रस्तोता– डा. के. वेङ्कटेश्वर्लुः**

अस्मिन् संसारे अद्यावधि याः संस्कृतयः प्राप्यन्ते तासु सर्वासु संस्कृतिषु भारतीया संस्कृतिः प्राचीनतमा। जगति यदा अन्यराष्ट्रवासिनः पशव इवाज्ञानिनः आसन् तदा भारतीयाः सुसंस्कृतज्ञाः सर्वासु विद्यासु पारङ्गताः सर्वासु कलासु च निष्णाताः आसन्। सभ्यतायाः आभ्यन्तरस्वरूप एव संस्कृतिरित्युच्यते। कस्यापि राष्ट्रस्य निवासिनां व्यवहारेण एव तस्य राष्ट्रस्य संस्कृतिः ज्ञातुं शक्यते। संस्कृतौ धर्मः दर्शनं साहित्यं नैतिकादर्शः कलादयश्च अन्तर्भवन्ति।

भारतीया संस्कृतिः वैदिककालादद्यावधि निरन्तरं संप्रवहमाना वर्तते। भारतीयसंस्कृतिः एका समन्विता संस्कृतिः वर्तते। यथा एका सुविशाला नदी अन्यनदीनां जलं गृहीत्वा समुद्रं प्रति गच्छति तथैव भारतीयसंस्कृतिरपि अन्यराष्ट्राणां संस्कृतिभ्यः शोभनविषयान् गृह्णन् निरन्तरं गतिशीला वर्तते। प्राचीनकालादेव विदेशीयाः समये समये भारतदेशं समुपागताः। तेषां संस्कृतयः अपि भारतीयसंस्कृत्या सह सम्मिलिताः सञ्जाताः। इत्थं भारतीया प्राचीनसंस्कृतिरेव समयानुसारं विविधाभिः विचारधाराभिः प्रभाविता भूत्वाधुनिका भारतीयसंस्कृतिः सञ्जाता।

भारतीयसंस्कृतेः अनेके विशेषताः सन्ति। सहिष्णुता उदारता परहितभावना कर्मपरायणतादयश्च अस्याः संस्कृतेः प्रमुखाः विशेषताः सन्ति। यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति अस्याः मतम्। विचारस्वातन्त्र्यं अस्याः अन्या विशेषता। अत एव अत्र विविधाः जातयो नानाधर्मावलम्बिनश्च जनाः स्वकीयाभिः विशेषताभिः सुखेन वसन्ति। भारतीयसंस्कृतौ सर्वेषां हितकामना क्रियते–

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद्दुःखभाग्भवेत्॥ इति।

संसारे क्वापि अस्याः संस्कृतेः केनापि सह विरोधो न दृश्यते। इयं संस्कृतिः उदारतां सहिष्णुतां क्षमां शुचितां सत्यपरतां शान्तिं सरलताम् अहिंसाम् उपकारञ्च सदैव गृहीत्वा शिक्षमाणा सर्वत्र आदर्शमार्गं प्रदर्शयति।

संसारस्य समस्तभाषासु संस्कृतभाषा प्राचीनतमा इति विदुषां मतम्। पूर्णसंस्कारयुक्ता इयं भाषा देवैर्विद्वद्भिः व्यवह्रियमाणत्वात् देवभाषेत्युच्यते। अस्यां भाषायां वेदाः उपवेदाः ब्राह्मणानि आरण्यकानि उपनिषदः षट्शास्त्राणि

अष्टादशपुराणानि रामायणमहाभारताद्यनेकग्रन्थाः विद्यन्ते। प्राचीनकाले अस्याः प्रचारः समस्तभारते आसीत् अतः सर्वे जनाः संस्कृतभाषायामेव वार्तालापं विदधति स्म। संस्कृतभाषायाः साहित्यं महत् समृद्धं वर्तते। भासशूद्रककालिदासभवभूतिप्रभृतयो नाट्यलेखकाः वाल्मीकिव्यासभारविमाघश्रीहर्षादयः कवयश्च संस्कृतभाषायामेव साहित्यरचनामकुर्वन्।

इयं सर्वासां भाषाणां जननीति बहूनां विदुषां मतम्। भारतीयभाषासु उडियाहिन्दी–बंगालीमराठीगुजरातीपञ्जाबीतमिलतेलुगुप्रभृतिषु बहवः शब्दाः संस्कृतनिष्ठाः। यद्यपि अधुना हिन्दीभाषा राष्ट्रभाषापदमलङ्करोति परं संस्कृतं विना हिन्दीभाषा पूर्णरूपेण असमर्था एव। संस्कृतस्य शब्दकोशो विशालः समृद्धश्च वर्तते, अतः संस्कृतमेव हिन्दीभाषां सुसमृद्धां सुसम्पन्नां च कर्तुं प्रभवति। हिन्दीभाषायाः पारिभाषिकशब्दास्तु संस्कृतधातूनामाश्रयेण एव निर्मीयन्ते।

भाषाविज्ञानस्य सम्यगध्ययनाय संस्कृतभाषायाः ज्ञानमनिवार्यमस्ति। भाषाविज्ञानदृष्ट्या संस्कृतभाषायाः महत्वपूर्णं स्थानमस्ति। भारतीयपुरातत्वविद्यार्थिनां कृते तु संस्कृतभाषायाः ज्ञानमत्यावश्यकं यतः प्रायशः सर्वे प्राचीनाः शिलालेखाः संस्कृतभाषायामेव लिखिताः सन्ति।

भारतीयसंस्कृतेः सम्यग्ज्ञानायापि संस्कृतस्याध्ययनस्य आवश्यकता विद्यते। भारतीयसंस्कृतिः अतिप्राचीना, सा च प्राचीनसंस्कृतग्रन्थेषु एव सन्निहिता। प्राचीनसंस्कृतग्रन्थानामध्ययनं विना संस्कृतभाषाज्ञानं न शक्यम्। संस्कारेषु संस्कृतभाषा एव प्रयुज्यते। संस्कृतमन्त्रान् विना कोऽपि संस्कारो न सम्पद्यते। संस्कृतभाषिणां जनानां तु अयं दृढविश्वासः यत् यदि संस्कृतभाषा राष्ट्रभाषापदासीना भवेत् तर्हि भाषाविवादः समाप्तो भवेदिति। वस्तुतः संसारे अद्यापि संस्कृतभाषा महत्वपूर्णं स्थानमावहति।

# क्षमाप्रभावः

प्रस्तोता– डा. के. वेङ्कटेश्वर्लुः

**क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति। अतृणे पतितो वह्निः स्वयमेवोपशाम्यति॥**
**क्षमा बलमशक्तानां शक्तानां भूषणं क्षमा। क्षमा वशीकृतिर्लोके क्षमया किन्न साध्यते॥**
**नरस्याभूषणं रूपं रूपस्याभरणं गुणः। गुणस्याभरणं ज्ञानं ज्ञानस्याभरणं क्षमा॥**
**क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम्। अपराधिषु सत्वेषु नृपाणां सैव दूषणम्॥**
**यः संधारयते मन्युं योऽतिवादांस्तितिक्षते। यश्च तप्तो न तपति दृढं सोऽर्थस्य भाजनम्॥**
**क्रोधो मूलमनर्थानां क्रोधः संसारवर्धनः। धर्मक्षयकरः क्रोधः तस्मात्क्रोधं विवर्जयेत्॥**
**क्रोधस्य कालकूटस्य विद्यते महदन्तरम्। स्वाश्रयं दहति क्रोधः कालकूटो न चाश्रयम्॥**

# संस्कृतगीतम्

(मनुजानां प्रबोधकम्.............)

**प्रस्तोता– डा. विद्यानन्द आर्यः**

गानशैली– कभी बन्धन जुडा लिया..........

मनुजानां प्रबोधकं संसेव्यैर्गुणैर्युतं भो राष्ट्रं नो...
मुनिभिर्विभूषितं पुरेदं मुनिभिर्विभूषितम्।
तस्येयं कावस्था संजाता दुरवस्था
हा राष्ट्रं नो......... भ्रष्टैः प्रपूरितं पुरेदं मुनिभिर्विभूषितम्।
मनुजानां प्रबोधकं.............

होमधूमानां गन्धैः सत्यवाचां सद्वाक्यैः
वेदमन्त्राणां ध्वनिभिः दिशो याता पावनताम्
श्लीलरहितैर्व्यर्थैर्गानैः साम्प्रतं व्याप्ताः प्रदूषितैः
तस्येयं कावस्था.............

सर्वविद्यानां प्रसरं भारताद् ये मन्यन्ते
पूर्वजा येषां नूनं शिक्षिता अस्मद्देशे
अद्य तेषां हितदयादृशं याचमानाः संयता भृशम्
तस्येयं कावस्था.............

देशस्वातन्त्र्यं प्राप्तुं संस्कृतेरस्तित्वार्थम्
जीवने किं किं कष्टं राष्ट्रभक्तैर्नावाप्तम्
महद् बलिदानं प्रभावतां दूष्यते दुष्टैर्दुराशयैः
तस्येयं कावस्था.............

पूर्वजा त्यक्त्वा लिप्सा स्वा भव्यभावान् हृदि कृता मुदा
मातृभूम्या श्रियमानेतुं बद्धसंकल्पा जितेन्द्रियाः
यद्येवं संकल्पं विदधाना वयमधुना
भो राष्ट्रं नो.......... मुनिभिर्विभूषितं पुरेदं मुनिभिर्विभूषितम्
मनुजानां प्रबोधकं.............